# Navagraha Stotram
## Source :-> [bhajansimran.com](bhajansimran.com)

श्री गणेशाय नमः

जपाकुसुमसंकाशं काश्यपेयं महद्युतिम्
तमोऽरि सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्

दधिशणखतुषाराभं क्शीरोदार्णवसंभवम्
नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम्

धरणीगर्भसंभूतं विद्युत्कान्तिसमप्रभम्
कुमारं शक्तिहस्तं च मणगलं प्रणमाम्यहम्

प्रियङ्गुकलिकाश्यामं रूपेणाप्रतिमं बुधम्
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम्

देवानां च ऋषीणां च गुरुं काञ्चनसंनिभम्
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम्

हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्
सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्

नीलांजनसमाभासं रविपुत्रं यमाग्रजम्
छायामार्तण्डसंभूतं तं नमामि शनैश्चरम्

अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम्
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम्

पलाशपुष्पसंकाशं तारकाग्रहमस्तकम्
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम्